"वसुदेवस्य देवक्यां जातो भोजेन्द्रबन्धने ॥"
बन्ध+कर्त्तरि ल्युः। महादेवस्य नामभेदे, पुं। यथा, महाभारते। १३। १७। १००।
"बन्धनो बन्धकर्त्ता च सुबन्धनविमोचनः ॥"
बन्धनकर्त्तरि, त्रि। यथा, तत्रैव।१३।१७।६१।
"बन्धनस्त्वसुरेन्द्राणां युधि शत्रुविनाशनः ॥")

बन्धनवेश्म, क्ली, (बन्धनाय बन्धनस्य वा वेश्म गृहम्।) कारागारम्। इति हारावली।१६६॥

बन्धनालयः, पुं, (बन्धनाय बन्धनस्य वा आलयः।) कारागारम्। इत्यमरः। २। ८। ११६॥

बन्धस्तम्भः, पुं, (बन्धाय स्तम्भः।) हस्तिबन्धनस्तम्भः। तत्पर्य्यायः। आलानम् २। इत्यमरः। २। ८। ४१॥ शङ्कुः ३ अचोड़ः ४। इति शब्दरत्नावली॥

बन्धित्रं, क्ली, (बन्ध+इत्र।) कामदेवः। इत्युणादिकोषः॥ चर्म्मव्यजनम्। इति संक्षिप्तसारोणादिवृत्तिः॥

बन्धुः, पुं, (बन्ध बन्धने+"शॄस्वृस्निहित्रपीति।" उणा० १।११। इति उः।) स्नेहेन मनो बध्नाति यः। तत्पर्य्यायः। सगोत्रः २ बान्धवः ३ ज्ञातिः ४ स्वः ५ स्वजनः ६। इत्यमरः। २। ६। ३४॥ दायादः ७ गोत्रः ८। इति शब्दरत्नावली॥ बन्धवश्च त्रिविधा। आत्मबन्धवः पितृबन्धवो मातृबन्धवश्चेति। यथोक्तम्।
"आत्मपितृष्वसुः पुत्त्रा आत्ममातृष्वसुः सुताः।
आत्ममातुलपुत्त्राश्च विज्ञेया ह्यात्मबान्धवाः॥
पितुः पितृष्वसुः पुत्त्राः पितुर्मातृष्वसुः सुताः।
पितुर्मातुलपुत्त्राश्च विज्ञेयाः पितृबान्धवाः॥
मातुःपितृष्वसुः पुत्त्रा मातुर्मातृष्वसुः सुताः।
मातुर्मातुलपुत्त्राश्च विज्ञेया मातृबान्धवाः॥"
तत्र चान्तरङ्गत्वात् प्रथममात्मबन्धवो धनभाजस्तदभावे पितृबन्धवस्तदभावे मातृबन्धव इति क्रमो वेदितव्यः। बन्धूनामभावे आचार्य्यः। इति मिताक्षरा॥ *॥ (यथा, मनुः।२।१३६।
"वित्तं बन्धुर्वयः कर्म्म विद्या भवति पञ्चमी।
एतानि मानस्थानानि गरीयो यद्यदुत्तरम्॥"
"बन्धुः पित्रादिः।" इति तट्टीकायां कुल्लूकभट्टः॥) बन्धूकः। (यथा, अशोकवधे। २६।
"अभ्यर्च्य बन्धुपुष्पमालयेति॥")
मित्रम्। (यथा, मेघदूते। ३४।
"बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः॥")
भ्राता। इति मेदिनी॥ (यथा, रघुः। १२।१२।
"अथानाथाः प्रकृतयो मातृबन्धुनिवासिनम्।
मौलैरानाययामासुर्भरतं स्तम्भिताश्रुभिः॥")

बन्धुकः, पुं, (बन्ध+उकः। यद्वा, बन्धुर्बन्धूकवृक्ष एव। बन्धु+स्वार्थे कन्।) बन्धूकवृक्षः। इति शब्दरत्नावली॥

बन्धुजीवः। बन्धुरिव जीवयति रसादिनेति। बन्धु+जीव+अच्।) बन्धूकवृक्षः। इति शब्दरत्नावली॥ (यथा, रघुः। ११। २५।
"वीक्ष्य वेदिमथ रक्तबिन्दुभि-
र्बन्धुजीवपृथुभिः प्रदूषिताम्॥")

बन्धुजीवकः, पुं, (बन्धुवत् जीवयति रसादिना इति। बन्धु+जीव+ण्वुल्। यद्वा, बन्धुजीव एव। स्वार्थे कन्।) बन्धूकवृक्षः। इत्यमरः। २। ४। ७३॥

बन्धुता, स्त्री, (बन्धोर्भावः बन्धूनां समूहो वा इति। "ग्रामजनबन्धुभ्यस्तल्।" ४।२।४३। इति तल्।) बन्धूनां समूहः। बन्धोर्भावः। इत्यमरः।२।६।३५॥ (यथा, ऋग्वेदे। ४। ४। ११।
"महो रुजामि बन्धुता वचोभिः॥")

बन्धुदत्तम्, क्ली, (बन्धुना दत्तम्।) पितृमातृभ्यां दत्तं स्त्रीधनम्। यथा। याज्ञवल्क्यः।
"बन्धुदत्तं यथा शुक्लमन्वाधेयकमेव च।
अप्रजायामतीतायां बान्धवास्तदवाप्नुयुः॥"
बन्धुदत्तपदेन कन्यादशायां यत् पितृभ्यां दत्तं तदुच्यते। इति दायभागः॥

बन्धुरं, क्ली, (बन्ध बन्धने+"मद्गुरादयश्च।" उणा० १। ४२। इति उरप्रत्ययेन निपातनात् साधुः।) मुकुटम्। इति शब्दरत्नावली॥ (रथबन्धनम्। यथा, महाभारते। ३। ३२। ३१।
"अन्ये छत्रं वरूथञ्च बन्धुरञ्च तथापरे।
गन्धर्व्वा बहुसाहस्रास्तिलशो व्यधमन्नृथम्॥"
तथा च भागवते। ४। २६। १।
"हैमं द्विचक्रमेकाक्षं त्रिवेणुं पञ्चबन्धुरम्॥")

बन्धुरः, पुं, (बन्ध+"मद्गुरादयश्च।" उणा० १।४२। इति उरः निपातनात् साधुः।) स्त्रीचिह्नम्। तिलकल्कम्। बन्धूकः। बधिरः। हंसः। इति मेदिनी। रे, १८६॥ विड़ङ्गः। इति हेमचन्द्रः॥ ऋषभौषधम्। इति राजनिर्घण्टः॥ बकः। विहङ्गः। इति शब्दरत्नावली॥

बन्धुरः, त्रि, (बन्ध+उर।) रम्यम्। (यथा, महागणपतिस्तोत्रे। १५।
"श्रेयः स्थेयः स देयान्मम विमलदृशो बन्धुरं
सिन्धुरास्यः॥")
नम्रम्। इति मेदिनी। रे, १८६॥ उन्नतानतम्। इत्यमरः॥ (यथा, रघुः। १३। ४७।
"बध्नाति मे बन्धुरगात्रि! चक्षु-
र्दृप्तः ककुद्मानिव चित्रकूटः॥")

बन्धुरा, स्त्री, (बन्धुर+टाप्।) पण्ययोषा। इति मेदिनी। रे, १६०॥

बन्धुराः, पुं, शक्तवः। इति मेदिनी। रे, १६०॥ बहुवचनान्तोऽयम्॥

बन्धुलः, पुं, (बन्धुं लातीति। बन्धु+ला+क।) असतीसुतः। इत्यमरः।२। ६। २६॥ (यथा, मृच्छकटिकनाटके चतुर्थे अङ्के।
"परगृहललिताः परान्नपुष्टाः
परपुरुषैर्जनिताः पराङ्गनासु।
परधननिरता गुणेष्ववाच्या
गजकलभा इव बन्धुला ललामः॥")
बन्धूकः। इति शब्दरत्नावली॥

बन्धुलः, त्रि, (बन्धून् लाति स्नेहेन गृह्णातीति। बन्धु+ला+क।) सुन्दरः। नम्रः। इत्यजयपालः॥

बन्धूकः, पुं, (बध्नाति सौन्दर्य्येण चित्तमिति। बन्ध+"उलूकादयश्च।" उणा० ४। ४१। इति ऊकः।) पीतशालकः। इति मेदिनी। के, १२८॥ पुष्पवृक्षविशेषः। बाँदुली इति वङ्गभाषा। दोपहरिया इति हिन्दी भाषा। तत्पर्य्यायः। रक्तकः २ बन्धूजीवकः ३। इत्यमरः।२।४।७३॥ बन्धुकः ४ बन्धुः ५ बन्धुलः ६ बन्धुजीवकः ७ बन्धुजीवः ८ बन्धूलिः ९ बन्धुरः १०। इति शब्दरत्नावली॥ रक्तः ११ माध्याह्निकः १२। इति भावप्रकाशः॥ ओष्ठपुष्पः १३ अर्कवल्लभः १४ मध्यन्दिनः १५ रक्तपुष्पः १६ रागपुष्पः १७ हरिप्रियः १८। अस्य गुणाः।
"असितसितपीतलोहितपुष्पविशेषात् चतुर्व्विधो
बन्धूकः।
ज्वरहरो विविधारिग्रहपिशाचशमनः प्रसादनः
सवितुः स्यात्॥"
इति राजनिर्घण्टः॥
"बन्धूकः कफकृद्ग्राही रक्तपित्तहरो लघुः॥"
इति भावप्रकाशः॥
खधूपे, क्ली। वन्दूक इति ख्यातम्। यथा,—
"बन्धूको बन्धुजीवे स्यात् खधूपे स्यान्नपुंसकम्॥"
इति हेमचन्द्रः॥

बन्धूकपुष्पः, पुं, (बन्धूकस्य बन्धूजीवस्य पुष्पमिव पुष्पं यस्य।) पीतशालः। इत्यमरः।२।४।४४॥ वीजकः। इति राजनिर्घण्टः॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"वीजकः पीतसारश्च पीतशालक इत्यपि।
बन्धूकपुष्पः प्रियकः सर्ज्जकश्चासनः स्मृतः॥")

बन्धूरः, पुं, (बन्ध बन्धने। बन्ध+"मद्गुरादयश्च।" उणा० १। ४२। इत्यत्र खर्ज्जूरादित्वादूरप्रत्ययेन सिद्धम् इत्युज्ज्वलदत्तः।) विवरम्। इत्युणादिकोषः॥

बन्धूरः, त्रि, (बन्ध+खर्ज्जूरादित्वादूरप्रत्ययः।) रम्यः। नम्रः। यथा, रभसे।
"बन्धूरबन्धुरौ रम्ये नम्रे हंसे तु बन्धुरः॥"
उन्नतानतम्। स्वभावात् यदुन्नतं उपाधिवशादीषन्नतं तत्। क्वचिदुन्नतं क्वचिदानतं स्थलादिकम्। इति केचित्। इत्यमरटीकायां भरतः॥

बन्धूलिः, पुं, (बन्ध बन्धने। बन्ध+ऊलि।) बन्धूकवृक्षः। इति शब्दरत्नावली॥

बन्ध्यः, त्रि, (बन्ध+यक्।) ऋतुप्राप्तावधिफलरहितवृक्षादिः। (यथा, रघुः। १। ७०।
"सिक्तं स्वयमिव स्नेहाद्बन्ध्यमाश्रमपादपम्॥")
तत्पर्य्यायः। अफलः २ अवकेशी ३। इत्यमरः। २। ४। ७॥ विफलः ४ निष्फलः ५। इति राजनिर्घण्टः॥ बन्धनीयः। इति बन्धधातोः कर्म्मणि यप्रत्ययः॥ (यथा, याज्ञवल्क्यः।२।२४६।
"अबन्ध्यं यश्च बध्नाति बद्धं यश्च प्रमुञ्चति॥"
पुं, निवर्त्तितवारिः सेतुः। यथा, मिताक्षरायाम्।
"सेतुश्च द्विविधो ज्ञेयः खेयो बन्ध्यस्तथैव च।
तोयप्रवर्त्तनात् खेयो बन्ध्यः स्यात्तन्निवर्त्तनात्॥")